च्यम् एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात् यथा एकस्य केशस्य दूरेऽप्रत्यक्षत्वे तत्समूहस्य प्रत्यक्षत्वम्। न च एकः स्थूलो महान् घट इति बुद्धेरनुपपत्तिरिति वाच्यम् एको महान् धान्यराशिरितिवदुपपत्तेः, नैवं परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षायोग्यत्वात् दूरस्थकेशस्तु नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात्। न च तदानीम् अदृश्यपरमाणुपुञ्जात् दृश्यपरमाणुपुञ्जस्योत्पन्नत्वात् न प्रत्यक्षत्वे विरोध इति वाच्यम् अदृश्यस्य दृश्यानुपादानत्वात् अन्यथा चक्षुरूष्मादिसन्ततौ कदाचिद् दृश्यत्वप्रसङ्गात्। न चातितप्ततैलादौ कथमदृश्यदहनसन्ततेः दृश्यदहनोत्पत्तिरिति वाच्यं तत्र तदन्तःपातिभिः दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात्। न च अदृश्यद्व्यणुकेन कथं त्रसरेणोरुत्पत्तिरिति? वाच्यम्। यतो न वयं दृश्यत्वमदृश्यत्वं वा कस्यचित् स्वभावादाचक्ष्महे परन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवशात् दृश्यत्वं तथा च त्रसरेणोर्महत्त्वात् प्रत्यक्षं न तु द्व्यणुकादेःतदभावात् न हि तन्मतेऽपीदं सम्भवति परमाणौ महत्त्वाभावात् इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षत्वादनित्यत्वं तेषां चावयवावयविधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः। अतः क्वचिद्विश्रामो वाच्यः यत्र च विश्रामस्तस्यानित्यत्वे त्वसमवेतकार्य्योत्पत्तिप्रसङ्गः स्यात् अतस्तस्य नित्यत्वं महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्ति इति तस्य परमाणुत्वसिद्धिः न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यं त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवाः महदवयवत्त्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः न चेदमप्रयोजकम् अपकृष्टमहत्त्वं प्रति अनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् नचैवं क्रमेण तदवयवधारापि सिध्येदिति वाच्यम् अनवस्थाभयेन तदसिद्धेः”। व्याख्यातञ्चैतत् दिनकर्य्याम्। ‘बौद्धः शङ्कते नन्विति नन्वयं घटइत्यादि प्रतीतिरेव तत्र प्रमाणं भविष्यतीत्यत आह परमाणुपुञ्जैरेवेति विलक्षणसंस्थानविशिष्टैः परमाणुभिरेवेत्यर्थः उपपत्तेरिति अयं घट इत्यादिप्रतीतेरुपपत्तेरित्यर्थः। तत् समूहस्य परमाणुसमूहस्य। तत्र दृष्टान्तमाह यथेति। तत्समूहस्य केशसमूहस्य। अनुपपत्तिरिति परमाणुविषयत्वादिति शेषः उपपत्तेरिति तत्र यथा धान्यसमूहस्यैकत्वादेक इति प्रतीतिरेवं संयोगविशेषस्यैव महत्त्वात्मकतया महानिति प्रतीतिस्तथा परमाणुपुञ्जेष्वपीति भावः। प्रत्यक्षायोग्यत्वादिति तथाच स्वभावतोऽयोग्यानां परमाणूनां परस्परसंयोगमात्रेण योग्यत्वं न सम्भवतीति भावः। दूरस्थकेशस्तु स्वभावतो नातीन्द्रिय इति त्वदुक्तदृष्टान्तस्य वैषम्यमित्याह दूरस्थकेशस्त्विति तस्य दूरस्थ केशस्य। तस्यैवेति एवकारस्य प्राक्तनसन्निधानपदेनान्वेति तथाच सन्निधान एव तस्य प्रत्यक्षत्वादित्यर्थः तथाच दूरत्वस्य प्रतिबन्धकत्वात्तद्दशायाम् अप्रत्यक्षत्वमात्रं तस्य, न तु स्वाभाविका प्रत्यक्षत्वमिति भावः। उत्पन्नत्वादिति क्षणभङ्गवादिनां मते परमाणूनामुत्पत्तिस्वीकारादिति भावः। अन्यथा अदृश्यस्य दृश्योत्पादकत्वे। तत्र तादृशदहनोत्पत्तिस्थले)। तदन्तःपातिभिः अतितप्ततैलान्तःपातिभिः। स्वभावात् कारणनैरपेक्ष्यात् उद्भूतरूपादीति आदिनालोकादिपरिग्रहः। तदभावे महत्त्वोद्भूतरूपाद्यभावे महत्त्वाभावादित्यर्थः। अत्र नास्तिकमतानुयायिनः परस्पर विभक्तपरमाणूनां महत्त्वाभावादप्रत्यक्षत्वेऽपि परस्पर संयुक्तानां पुञ्जात्मनान्तेषां प्रत्यक्षे बाधकाभावः नच महत्त्वाभावएव बाधकः परस्परविलक्षणसंयोगस्यैव महत्त्वरूपस्य प्रत्यक्षजनकत्वात् नच परमाणूनां नित्यत्वाद्घटादावुत्पत्तिनाशयोः प्रतीत्यनुपपत्तिरिति वाच्यम् तन्मते पदार्थमात्रस्यैव क्षणिकत्वात् परमाणूनामुपत्पत्तिनाशयोः स्वीकारात् नच परमाणुपुञ्जेषु घटत्वाङ्गीकारे कपालाद्घट इति प्रतीतेरनुपपत्तिः परमाणूनां कपालजन्यत्वाभावादिति वाच्यं तन्मते कपालस्यापि परमाणुपुञ्जरूपतया घटरूपपुञ्जेषु कपालरूपपुञ्जजन्यत्वस्वीकारात् पुञ्जात् पुञ्जोत्पत्तिरिति तेषां सिद्धान्तादित्याहुः, तन्न घट इत्यादिप्रतीतिविषयताया अनेकपरमाणुषु कल्पने गौरवात् अवयवातिरिक्तावयविसिद्धिरिति दिक्। मेरुसर्षपयोरपीति अपिशब्दः साम्यप्रसङ्ग इत्युत्तरं सम्बध्यते तेन च द्व्यणुकस्य सावयवारब्धत्वे महत्त्वापत्तिः समुच्चीयते साम्यं परिमाणतारतम्याभावः परिमाणकारणीभूताया अवयवसंख्याया उभयत्र साम्यादिति भावः। नच मेर्ववयवानां न सर्षपतुल्यपरिमाणवत्त्वं, सर्षपावयवानां च न मेर्ववयवतुल्यपरिमाणवत्त्वमित्यवयवपरिमाणविशेषाद्विशेष इति वाच्यम् मेर्ववयवसर्षपावयवयोरप्यनन्तावयवत्वेन तत्परिमाणतारतम्याभावस्याप्यापादनीयत्वात् नच मेरुसर्षपयोरवयवगतप्रचयाख्यसंयोगविशेष इति वाच्यम् प्रचयविशेषस्यापि संख्याविशेषनियम्यत्वेन संख्याविशेषाभावे तद्वि-